# श्रीमीनाक्षी पञ्चरत्नम्

उद्यद्भानु सहस्रकोटि सदृशां केयूर हारोज्ज्वलां
बिम्बोष्ठीं स्मित दन्त पंक्ति रुचिरां पीताम्ब रालंकृताम् ।
विष्णु ब्रह्म सुरेन्द्र सेवितपदां तत्व स्वरूपां शिवां
मीनाक्षीं प्रणतोऽस्मि संततमहं कारुण्यवारां निधिम् ॥ १॥

मुक्ताहार लसत्किरीट रुचिरां पूर्णेन्दु वक्त्र प्रभां
शिञ्जन्नूपुर किंकिणि मणिधरां पद्मप्रभा भासुराम् ।
सर्वाभीष्ट फलप्रदां गिरिसुतां वाणी रमा सेवितां
मीनाक्षीं प्रणतोऽस्मि संततमहं कारुण्यवारां निधिम् ॥ २॥

श्रीविद्यां शिव वामभाग निलयां ह्रींकार मन्त्रोज्ज्वलां
श्रीचक्राङ्कित बिन्दु मध्य वसतिं श्रीमत्सभानायकीम् ।
श्रीमत्षण्मुख विघ्नराज जननीं श्रीमज्जगन्मोहिनीं
मीनाक्षीं प्रणतोऽस्मि संततमहं कारुण्यवारां निधिम् ॥ ३॥

श्रीमत्सुन्दर नायकीं भयहरां ज्ञानप्रदां निर्मलां
श्यामाभां कमलासनार्चितपदां नारायण स्यानुजाम् ।
वीणा वेणु मृदङ्ग वाद्य रसिकां नानाविधा मम्बिकां
मीनाक्षीं प्रणतोऽस्मि संततमहं कारुण्यवारां निधिम् ॥ ४॥

नानायोगि मुनीन्द्र हृन्निवसतीं नानार्थ सिद्धिप्रदां
नानापुष्प विराजितांघ्रि युगलां नारायणेनार्चिताम् ।
नादब्रह्ममयीं परात्पर तरां नानार्थ तत्वात्मिकां
मीनाक्षीं प्रणतोऽस्मि संततमहं कारुण्यवारां निधिम् ॥ ५॥

इति श्रीमीनाक्षी पञ्चरत्नं सम्पूर्णम् ।